Homas
the spiritual way to success
K. Krishna Prasad Bhat
Website: http://homas.in
Email: homasonline@gmail.com
Mobil: 8000858858 /9940406777



अथ मोहिनीमन्त्रः —

ईशान ऋषिः । जगती छन्दः । मोहिनी देवता । ऐं बीजम् । ह्रीं शक्तिः । क्लीं कीलकम् । मोहने० ।। ऐं ह्रां हृद् । ऐं ह्रीं शिरः । इत्याद्यङ्गानि करन्यासश्च ।। ध्यानम् —

भुवनविजयदक्षा पुष्पबाणेक्षुचापा
जगति विविधरूपं दर्शयन्ती जनानाम् ।
तरुणतरणिशोभा श्वेतवासो वसाना
जयति निखिललोकान् जाग्रती मोहिनीयम् ।।

ऐं ह्रीं क्लीं ओं नमो भगवति महामोहिनि महामाये सर्वलोकवशंकरि देवदत्तस्य वाक्चक्षुश्चित्तं मोहय मोहय नानारूपाकृतीः शीघ्रं दर्शय दर्शय ह्रीं स्वाहा ।। पञ्चसहस्रं जपः ।।

पञ्चकोणं लिखेच्छक्तिं मध्ये बीजेन वेष्टयेत् ।
पञ्चकोणे लिखेच्छक्तिं बाह्ये साध्यसमन्वितम् ।।

देवदत्तमुखे यन्त्रं दर्शयन्प्रजपेन्मनुम् ।
जङ्गमाजङ्गमानां च देवभूतादिरक्षमाम् ।।

पुरतो विविधं रूपं दर्शनं विस्मयं भवेत् ।